श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकियरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### एकषष्टितमः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## एकषष्टितमः सर्गः

*मधुवनं गत्वा तत्रत्यानां मधूनां फलानां च वानरैर्यथेष्टमुपभोगो वनरक्षकस्य भुवि विकर्षणं च*

ततो जाम्बवतो वाक्यमगृह्णन्त वनौकसः।
अङ्गदप्रमुखा वीरा हनूमांश्च महाकपिः॥ ५.६१.१ ॥

प्रीतिमन्तस्ततः सर्वे वायुपुत्रपुरः सराः।
महेन्द्राग्रात् समुत्पत्य पुप्लुवुः प्लवगर्षभाः॥ ५.६१.२ ॥

मेरुमन्दरसङ्काशा मत्ता इव महागजाः।
छादयन्त इवाकाशं महाकाया महाबलाः॥ ५.६१.३ ॥

सभाज्यमानं भूतैस्तमात्मवन्तं महाबलम्।
हनूमन्तं महावेगं वहन्त इव दृष्टिभिः॥ ५.६१.४ ॥

राघवे चार्थनिर्वृत्तिं कर्तुं च परमं यशः।
समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः॥ ५.६१.५ ॥

प्रियाख्यानोन्मुखाः सर्वे सर्वे युद्धाभिनन्दिनः।
सर्वे रामप्रतीकारे निश्चितार्था मनस्विनः॥ ५.६१.६ ॥

प्लवमानाः खमाप्लुत्य ततस्ते काननौकसः।
नन्दनोपममासेदुर्वनं द्रुमशतायुतम्॥ ५.६१.७ ॥

यत् तन्मधुवनं नाम सुग्रीवस्याभिरक्षितम्।
अधृष्यं सर्वभूतानां सर्वभूतमनोहरम्॥ ५.६१.८ ॥

यद् रक्षति महावीरः सदा दधिमुखः कपिः।
मातुलः कपिमुख्यस्य सुग्रीवस्य महात्मनः॥ ५.६१.९ ॥

ते तद् वनमुपागम्य बभूवुः परमोत्कटाः।
वानरा वानरेन्द्रस्य मनः कान्तं महावनम्॥ ५.६१.१०॥

ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत्।
कुमारमभ्ययाचन्त मधूनि मधुपिङ्गलाः॥ ५.६१.११॥

ततः कुमारस्तान् वृद्धाञ्जाम्बवत्प्रमुखान् कपीन्।
अनुमान्य ददौ तेषां निसर्गं मधुभक्षणे॥ ५.६१.१२॥

ते निसृष्टाः कुमारेण धीमता वालिसूनुना।
हरयः समपद्यन्त द्रुमान् मधुकराकुलान्॥ ५.६१.१३॥

भक्षयन्तः सुगन्धीनि मूलानि च फलानि च।
जग्मुः प्रहर्षं ते सर्वे बभूवुश्च मदोत्कटाः॥ ५.६१.१४॥

ततश्चानुमताः सर्वे सुसंहृष्टा वनौकसः।
मुदिताश्च ततस्ते च प्रनृत्यन्ति ततस्ततः॥ ५.६१.१५॥

गायन्ति केचित् प्रणमन्ति केचि-
न्नृत्यन्ति केचित् प्रणमन्ति केचित्।
पतन्ति केचित् प्रचरन्ति केचित्
प्लवन्ति केचित् प्रलपन्ति केचित्॥ ५.६१.१६॥

परस्परं केचिदुपाश्रयन्ति
परस्परं केचिदतिब्रुवन्ति।
द्रुमाद् द्रुमं केचिदभिद्रवन्ति
क्षितौ नगाग्रान्निपतन्ति केचित्॥ ५.६१.१७॥

महीतलात् केचिदुदीर्णवेगा
महाद्रुमाग्राण्यभिसम्पतन्ति।
गायन्तमन्यः प्रहसन्नुपैति
हसन्तमन्यः प्ररुदन्नुपैति॥ ५.६१.१८॥


www.prapatti.com

तुदन्तमन्यः प्रणदन्नुपैति
    समाकुलं तत् कपिसैन्यमासीत्।
न चात्र कश्चिन्न बभूव मत्तो
    न चात्र कश्चिन्न बभूव दृप्तः॥ ५.६१.१९ ॥

ततो वनं तत् परिभक्ष्यमाणं
    द्रुमांश्च विध्वंसितपत्रपुष्पान्।
समीक्ष्य कोपद् दधिवक्त्रनामा
    निवारयामास कपिः कपींस्तान्॥ ५.६१.२० ॥

स तैः प्रवृद्धैः परिभर्त्स्यमानो
    वनस्य गोप्ता हरिवृद्धवीरः।
चकार भूयो मतिमुग्रतेजा
    वनस्य रक्षां प्रति वानरेभ्यः॥ ५.६१.२१ ॥

उवाच कांश्चित् परुषाण्यभीत-
    मसक्तमन्यांश्च तलैर्जघान।
समेत्य कैश्चित् कलहं चकार
    तथैव साम्नोपजगाम कांश्चित्॥ ५.६१.२२ ॥

स तैर्मदादप्रतिवार्यवेगै-
    र्बलाच्च तेन प्रतिवार्यमाणैः।
प्रधर्षणे त्यक्तभयैः समेत्य
    प्रकृष्यते चाप्यनवेक्ष्य दोषम्॥ ५.६१.२३ ॥

नखैस्तुदन्तो दशनैर्दशन्त-
    स्तलैश्च पादैश्च समापयन्तः।
मदात् कपिं ते कपयः समन्ता-
    न्महावनं निर्विषयं च चक्रुः॥ ५.६१.२४ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकषष्टितमः सर्गः॥



www.prapatti.com